# ॥ वाल्मीकि रामायण ॥

## ३ अरण्यकाण्ड

### अध्याय ४

हत्वा तु तं भीमबलं विराधं राक्षसं वने ।
ततः सीतां परिष्वज्य समाश्वास्य च वीर्यवान् ।
अब्रवील्लक्ष्मणं रामो भ्रातरं दीप्ततेजसं ॥ १ ॥

कष्टं वनमिदं दुर्गं न च स्मो वनगोचराः ।
अभिगच्छामहे शीघ्रं शरभङ्गं तपोधनम् ॥ २ ॥

आश्रमं शरभङ्गस्य राघवोऽभिजगाम ह ॥ ३ ॥

तस्य देवप्रभावस्य तपसा भावितात्मनः ।
समीपे शरभङ्गस्य ददर्श महदद्भुतम् ॥ ४ ॥

विभ्राजमानं वपुषा सूर्यवैश्वानरोपमम् ।
असंस्पृशन्तं वसुधां ददर्श विबुधेश्वरम् ॥ ५ ॥

सुप्रभाभरणं देवं विरजोऽम्बरधारिणम् ।
तद्विधैरेव बहुभिः पूज्यमानं महात्मभिः ॥ ६ ॥

हरिभिर्वाजिभिर्युक्तमन्तरिक्षगतं रथम् ।
ददर्शादूरतस्तस्य तरुणादित्यसंनिभम् ॥ ७ ॥

पाण्डुराभ्रघनप्रख्यं चन्द्रमण्डलसंनिभम् ।
अपश्यद्विमलं छत्रं चित्रमाल्योपशोभितम् ॥ ८ ॥

चामरव्यजने चाग्र्ये रुक्मदण्डे महाधने ।
गृहीते वननारीभ्यां धूयमाने च मूर्धनि ॥ ९ ॥

गन्धर्वामरसिद्धाश्च बहवः परमर्षयः ।
अन्तरिक्षगतं देवं वाग्भिरग्र्याभिरीडिरे ॥ १० ॥

दृष्ट्वा शतक्रतुं तत्र रामो लक्ष्मणमब्रवीत् ।
ये हयाः पुरुहूतस्य पुरा शक्रस्य नः श्रुताः ।
अन्तरिक्षगता दिव्यास्त इमे हरयो ध्रुवम् ॥ ११ ॥

इमे च पुरुषव्याघ्र ये तिष्ठन्त्यभितो रथम् ।
शतं शतं कुण्डलिनो युवानः खड्गपाणयः ॥ १२ ॥

उरोदेशेषु सर्वेषां हारा ज्वलनसंनिभाः ।
रूपं बिभ्रति सौमित्रे पञ्चविंशतिवार्षिकम् ॥ १३ ॥

एतद्धि किल देवानां वयो भवति नित्यदा ।
यथेमे पुरुषव्याघ्रा दृश्यन्ते प्रियदर्शनाः ॥ १४ ॥

इहैव सह वैदेह्या मुहूर्तं तिष्ठ लक्ष्मण ।
यावज्जनाम्यहं व्यक्तं क एष द्युतिमान्रथे ॥ १५ ॥

तमेवमुक्त्वा सौमित्रिमिहैव स्थीयताम् इति ।
अभिचक्राम काकुत्स्थः शरभङ्गाश्रमं प्रति ॥ १६ ॥

ततः समभिगच्छन्तं प्रेक्ष्य रामं शचीपतिः ।
शरभङ्गमनुज्ञाप्य विबुधानिदमब्रवीत् ॥ १७ ॥

इहोपयात्यसौ रामो यावन्मां नाभिभाषते ।
निष्ठां नयत तावत्तु ततो मां द्रष्टुमर्हति ॥ १८ ॥

जितवन्तं कृतार्थं च द्रष्टाहमचिरादिमम् ।
कर्म ह्यनेन कर्तव्यं महदन्यैः सुदुष्करम् ॥ १९ ॥

इति वज्री तमामन्त्र्य मानयित्वा च तापसं ।
रथेन हरियुक्तेन ययौ दिवमरिन्दमः ॥ २० ॥

प्रयाते तु सहस्राक्षे राघवः सपरिच्छदः ।
अग्निहोत्रमुपासीनं शरभङ्गमुपागमत् ॥ २१ ॥

तस्य पादौ च सङ्गृह्य रामः सीता च लक्ष्मणः ।
निषेदुस्तदनुज्ञाता लब्धवासा निमन्त्रिताः ॥ २२ ॥

ततः शक्रोपयानं तु पर्यपृच्छत्स राघवः ।
शरभङ्गश्च तत्सर्वं राघवाय न्यवेदयत् ॥ २३ ॥

मामेष वरदो राम ब्रह्मलोकं निनीषति ।
जितमुग्रेण तपसा दुष्प्रापमकृतात्मभिः ॥ २४ ॥

अहं ज्ञात्वा नरव्याघ्र वर्तमानमदूरतः ।
ब्रह्मलोकं न गच्छामि त्वामदृष्ट्वा प्रियातिथिम् ॥ २५ ॥

समागम्य गमिष्यामि त्रिदिवं देवसेवितम् ।

अक्षया नरशार्दूल जिता लोका मया शुभाः ।
ब्राह्मयाश्च नाकपृष्ठ्याश्च प्रतिगृह्णीष्व मामकान् ॥ २६ ॥

एवमुक्तो नरव्याघ्रः सर्वशास्त्रविशारदः ।
ऋषिणा शरभङ्गेन राघवो वाक्यमब्रवीत् ॥ २७ ॥

अहमेवाहरिष्यामि सर्वाँल्लोकान्महामुने ।
आवासं त्वहमिच्छामि प्रदिष्टमिह कानने ॥ २८ ॥

राघवेणैवमुक्तस्तु शक्रतुल्यबलेन वै ।
शरभङ्गो महाप्राज्ञः पुनरेवाब्रवीद्वचः ॥ २९ ॥

सुतीक्ष्णमभिगच्छ त्वं शुचौ देशे तपस्विनम् ।
रमणीये वनोद्देशे स ते वासं विधास्यति ॥ ३० ॥

एष पन्था नरव्याघ्र मुहूर्तं पश्य तात माम् ।
यावज्जहामि गात्राणि जीर्णं त्वचमिवोरगः ॥ ३१ ॥

ततोऽग्निं स समाधाय हुत्वा चाज्येन मन्त्रवित् ।
शरभङ्गो महातेजाः प्रविवेश हुताशनम् ॥ ३२ ॥

तस्य रोमाणि केशांश्च ददाहाग्निर्महात्मनः ।
जीर्णं त्वचं तथास्थीनि यच्च मांसं च शोणितम् ॥ ३३ ॥

स च पावकसङ्काशः कुमारः समपद्यत ।
उत्थायाग्निचयात्तस्माच्छरभङ्गो व्यरोचत ॥ ३४ ॥

स लोकानाहिताग्नीनामृषीणां च महात्मनाम् ।
देवानां च व्यतिक्रम्य ब्रह्मलोकं व्यरोहत ॥ ३५ ॥

स पुण्यकर्मा भुवने द्विजर्षभः
पितामहं सानुचरं ददर्श ह ।
पितामहश्चापि समीक्ष्य तं द्विजं
ननन्द सुस्वागतमित्युवाच ह ॥ ३६ ॥

---

The files in this directory are revised versions of the digital files produced by Professor Muneo Tokunaga, Kyoto University, and copyrighted by him. I am grateful to Professor Tokunaga for his agreement to this use of his original files and for permitting the revised versions to be made publicly available.
Dr J. D. Smith ; email: jds10@cam.ac.uk ; http://bombay.oriental.cam.ac.uk/index.html

---

ITRANS conversion questions to: Avinash Chopde ¡avinash@acm.org¿

---

Last updated on March 25, 1998; Send corrections to sanskrit@cheerful.com